# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा - शास्त्री-३, सेमेस्टर-५ | प्रश्नपत्रम् - ७ | गुणा: - ७० |
| विषय: - धर्मशास्त्रम् | कोड - CE-3.5.9 | समय: - ११-०२ |
| दिनाङ्क: - १.१२.२०१६ | ग्रन्थ: - याज्ञवल्क्यस्मृति: - प्रायश्चित्ताध्याय: | |

---

**प्रथमान्विति: ( युनिट - १ )**

**प्रश्न: १ कयोश्चिद् द्वयो: ससन्दर्भपुरस्सरम् भावार्थो लेख्य: । ०८**

*(१) आपद्गत: संप्रगृह्णन्भुञ्जानो वायतस्तत: ।*
*न लिप्येतैनसा विप्रो ज्वलनार्क समोहि स: ॥*

*(२) तस्य वृत्तं कुलं शीलं श्रुतमध्ययनं तप: ।*
*ज्ञात्वा राजा कुटुम्बं च धर्म्यां वृत्तिं प्रकल्पयेत् ॥*

*(३) नाश्रम: कारणं धर्मे क्रियमाणो भवेद्धि स: ।*
*अतो यदात्मनोऽपथ्यं परेषां न तदाचरेत् ॥*

**प्रश्न: २ द्वयोर्प्रश्नयोर्मध्ये एकस्योत्तरं यथाग्रन्थं सविस्तरेण लेख्य: । ०७**

*(१) जननमरणेशौचं वर्णानां कया रीत्या भवतीति यथाग्रन्थं लिखत ।*
*(२) गुरुमातुलश्वसुरादि राजादीनां च आशौचं केन प्रकारेण कर्तव्यं लिखत ।*

**प्रश्न: ३ प्रदत्तविषयेषु द्वयो: टिप्पणी कार्या । ०६**

*(१) संसारस्वरूपं निरूपणम् ।*
*(२) आपद्धर्मप्रकरणम् ।*
*(३) रजस्वलादीनां स्पर्शे निर्णय: ।*

**प्रश्न: ४ अधस्तनेषु चतुर्णां लघूत्तराणि देयानि । ०४**

*(१) योगीश्वर: क: ?*
*(२) कति वेदा: ?*
*(३) याज्ञवल्क्यस्मृतिमध्ये अंतिमाध्यायस्य किं नाम ?*
*(४) ब्राह्मणानां मरणसूतकं कति दिनात्मकं भवति ?*
*(५) क्षत्रीयाणां मरणसूतकं कति दिनात्मकं भवति ?*

**द्वितीयान्विति: ( युनिट - २ )**

**प्रश्न: ५ प्रदत्तश्लोकेषु द्वयो: व्याख्या कार्या । ०८**

*(१) कर्तव्याशय शुद्धिस्तु भिक्षुकेण विशेषत: ।*
*ज्ञानोत्पत्तिनिमित्तत्वात्स्वातन्त्र्य करणाय च ॥*

*(२) सत्यमस्तेयमक्रोधो ह्रीं शौचं धीर्धृतिर्दम: ।*
*संयतेन्द्रियता विद्या धर्म: सर्व उदाहृत: ॥*

(३) *आहुत्याप्यायते सूर्यः सूर्याद्वृष्टिरथौषधिः ।*
*तदन्नं रसरूपेण शुक्रत्वमधिगच्छति ॥*

**प्रश्नः ६ कस्यचिदेकस्य प्रश्नस्योत्तरं लिखत । ०६**

*(१) सकलशरीरवर्णनम् – स्वरूपनिरूपणम् यथाग्रन्थं चर्चयत ।*
*(२) क्षेत्रज्ञ स्वरूपम् यथाग्रन्थं वर्णयत ।*

**प्रश्नः ७ प्रदत्तविषयेषु द्वयोः टिप्पणीः कार्या । ०६**

*(१) स्वर्गमार्गे के गच्छन्ति ।*
*(२) अष्टांगयोगध्यानवर्णनम् ।*
*(३) मोक्षमार्गः ।*

## तृतीयान्वितिः ( युनिट – ३ )

**प्रश्नः ८ प्रदत्तश्लोकेषु द्वयोः सन्दर्भपुरस्सरं व्याख्या कार्या । ०८**

*(१) प्रायश्चित्तमकुर्वाणाः पापेषु निरतानराः ।*
*अपश्चात्तापिनः कष्टान्नरकान्यान्ति दारुणाम् ।*
*(२) ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः ।*
*एते महापातकिनो यश्च तैः सह संवसेत् ॥*
*(३) गुरुणामध्यधिक्षेपो वेदनिन्दा सुहृद्वधः ।*
*ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम् ॥*

**प्रश्नः ९ कस्यचिदेकस्य प्रश्नस्योत्तरं यथाग्रन्थं विस्तरेण लिखत । ०७**

*(१) धर्मशास्त्रे याज्ञवल्क्यस्मृतेः महत्त्वं प्रतिपादयन्तु ।*
*(२) प्रायश्चित्ताध्याये कति प्रकरणानि सन्ति ? कस्यचिदेकस्य सारांशः लेख्यः ।*

**प्रश्नः १० प्रदत्तविषयेषु द्वयोः टिप्पणीः लिख्या । ०६**

*(१) ज्येष्ठानां श्रेष्ठानां अपमानादि किं प्रायश्चितम् ?*
*(२) स्त्रीणां विशेषपतनीयानि ।*
*(३) त्रिकालसंध्यामहत्त्वम् ।*
*(४) कस्मै न स्पृशन्तीह पापानि ।*

**प्रश्नः ११ अधोलिखितेषु प्रश्नेषु चतुर्णां लघूत्तराणि देयानि । ०४**

*(१) रासभः शब्दस्य पर्यायवाची शब्दः कः ?*
*(२) शलभः शब्दस्य पर्यायं लिखत ?*
*(३) गुरुतल्पगः शब्दं स्पष्टयत ?*
*(४) नरके के व्रजन्ति ?*

=०=